

# દ્વાદશજ્યોતિર્લિંગસ્તોત્રમ્-સૌરાષ્ટ્રદેશે વિશદેઽતિરમ્યે

https://www.chalisa.online

|| દ્વાદશજ્યોતિર્લિંગસ્તોત્રમ્ ||
સૌરાષ્ટ્રદેશે વિશદેઽતિરમ્યે જ્યોતિર્મયં ચંદ્રકલાવતંસમ્ ।
ભક્તિપ્રદાનાય કૃપાવતીર્ણં તં સોમનાથં શરણં પ્રપદ્યે ॥ 1॥
શ્રીશૈલશૃંગે વિબુધાતિસંગે તુલાદ્રિતુંગેઽપિ મુદા વસંતમ્ ।
તમર્જુનં મલ્લિકપૂર્વમેકં નમામિ સંસારસમુદ્રસેતુમ્ ॥ 2॥
અવંતિકાયાં વિહિતાવતારં મુક્તિપ્રદાનાય ચ સજ્જનાનામ્ ।
અકાલમૃત્યોઃ પરિરક્ષણાર્થં વંદે મહાકાલમહાસુરેશમ્ ॥ 3॥
કાવેરિકાનર્મદયોઃ પવિત્રે સમાગમે સજ્જનતારણાય ।
સદૈવમાંધાતૃપુરે વસંતમોંકારમીશં શિવમેકમીડે ॥ 4॥
પૂર્વોત્તરે પ્રજ્વલિકાનિધાને સદા વસંતં ગિરિજાસમેતમ્ ।
સુરાસુરારાધિતપાદપદ્મં શ્રીવૈદ્યનાથં તમહં નમામિ ॥ 5॥
યામ્યે સદંગે નગરેઽતિરમ્યે વિભૂષિતાંગં વિવિધૈશ્ચ ભોગૈઃ ।
સદ્ભક્તિમુક્તિપ્રદમીશમેકં શ્રીનાગનાથં શરણં પ્રપદ્યે ॥ 6॥
મહાદ્રિપાર્શ્વે ચ તટે રમંતં સંપૂજ્યમાનં સતતં મુનીંદ્રૈઃ ।
સુરાસુરૈર્યક્ષ મહોરગાઢ્યૈઃ કેદારમીશં શિવમેકમીડે ॥ 7॥
સહ્યાદ્રિશીર્ષે વિમલે વસંતં ગોદાવરિતીરપવિત્રદેશે ।
યદ્દર્શનાત્પાતકમાશુ નાશં પ્રયાતિ તં ત્ર્યંબકમીશમીડે ॥ 8॥
સુતામ્રપર્ણીજલરાશિયોગે નિબધ્ય સેતું વિશિખૈરસંખ્યૈઃ ।
શ્રીરામચંદ્રેણ સમર્પિતં તં રામેશ્વરાખ્યં નિયતં નમામિ ॥ 9॥
યં ડાકિનિશાકિનિકાસમાજે નિષેવ્યમાણં પિશિતાશનૈશ્ચ ।
સદૈવ ભીમાદિપદપ્રસિદ્દં તં શંકરં ભક્તહિતં નમામિ ॥ 10॥
સાનંદમાનંદવને વસંતમાનંદકંદં હતપાપવૃંદમ્ ।
વારાણસીનાથમનાથનાથં શ્રીવિશ્વનાથં શરણં પ્રપદ્યે ॥ 11॥
ઇલાપુરે રમ્યવિશાલકેઽસ્મિન્ સમુલ્લસંતં ચ જગદ્વરેણ્યમ્ ।
વંદે મહોદારતરસ્વભાવં ઘૃષ્ણેશ્વરાખ્યં શરણમ્ પ્રપદ્યે ॥ 12॥
જ્યોતિર્મયદ્વાદશલિંગકાનાં શિવાત્મનાં પ્રોક્તમિદં ક્રમેણ ।
સ્તોત્રં પઠિત્વા મનુજોઽતિભક્ત્યા ફલં તદાલોક્ય નિજં ભજેચ્ચ ॥
॥ ઇતિ શ્રીમદ્શંકરાચાર્યવિરચિતં
દ્વાદશજ્યોતિર્લિંગસ્તોત્રં સંપૂર્ણમ્ ॥

|| https://www.chalisa.online ||